**मञ्जूषाखुन्याय:** The simile of a rat entering a casket. It is used to express the effort to obtain the coveted thing ending in a positive harm to one's life. कदाचित् कश्चिन्मूषको भक्ष्याशया सर्पमञ्जूषां दृष्ट्वा प्रविष्टस्तत्र तेन भक्षितः ।

**मणिविक्रयदृष्टान्त:** The illustration afforded by the sale of gems. It is intended to teach that, in disposing of precious stones, one who understands their value will derive greater advantage than one who is without that knowledge. यदेव विद्यया करोति...तदेव वीर्यवत्तरं भवति ।... दृष्टं हि लोके वणिक्शबरयोः पद्मरागादिमणिविक्रये वणिजो विज्ञानाधिक्यात् फलाधिक्यम् । तस्माद् यदेव विद्यया विज्ञानेन युक्तः सन् करोति कर्म... तदेव कर्म वीर्यवत्तरमविद्वत्कर्मणोऽधिकफलं भवति । Śaṁkara on Ch. Up. 1. 1. 10.

**मण्डूकप्लुतिन्याय:** The maxim of a frog's leap. It is used by grammarians and others to express the passing from one rule or topic to another over intervening ones. cf. Mbh. 1. 1. 3; 6. 1. 17. etc; केचन मण्डूकप्लुतिन्यायेनानुवर्तनस्यानुचितत्वाद् भ्रान्तिमदनन्तरमपह्नुतिर्ग्रन्थकृता लक्षिता उल्लेखश्चातिशयोक्त्यनन्तरमिति ग्रन्थं विपर्यासितवन्तः । जयरथ's com. on अलंकारसर्वस्व 20.

**मदशक्तिवत्** The simile of the power of an intoxicant. अत्रैके देहमात्रात्मदर्शिनो लोकायतिका देहव्यतिरिक्तस्यात्मनोऽभावं मन्यमानाः समस्तव्यस्तेषु बाह्येषु पृथिव्यादिषु अदृष्टमपि चैतन्यं शरीराकारपरिणतेषु भूतेषु स्यादिति संभावयन्तस्तेभ्यश्चैतन्यं मदशक्तिवद्विज्ञानं चैतन्यविशिष्टः कायः पुरुष इति चाहुः । Ś. B. on Br. Sūt. 3.3.53.

**मधु पश्यसि दुर्बुद्धे प्रपातं नानुपश्यसि** (Mb. 12. 311. 7) Oh wicked one, you behold the honey but do not behold the precipice. cf. मधु यः केवलं दृष्ट्वा प्रपातं नानुपश्यति । स भ्रष्टो मधुलोभेन शोचत्येवं यथा भवान् ॥ Mb. 11. 1. 37; यो हि मधुन्येव दत्तदृष्टिर्दुर्बलां शाखामधिरोहति तस्य विनिपात एव भवति । " मधुदृष्टिवदेवास्य गुणकामं प्रपश्यतः । क्रियाफलविनाशात्मा विनिपातः प्रसज्यते ॥ " शास्त्रदीपिका 3. 6. 3; दुग्धं पश्यति मार्जारो यथा न लगुडाहतिम् । Subhāṣ.; cf. " घी देखा पण बडगा नहि देखा ! "

**महतापि प्रयत्नेन तमिस्रायां परामृशन् । कृष्णशुक्लविवेकं हि न कश्चिदधिगच्छति** ( तंत्र 1. 3. 1 ) Not even by the most thorough examination, could one distinguish between black and white in pitchy darkness. This illustrates the impossibility of tracing the sources from which Manu and other Smriti writers derived their laws.

**मर्कटमदिरापानादिन्याय:** The simile of monkey drinking wine etc. cf. Marāṭhī equivalents : " आधींच तोंर त्यांत शिरलें वारें !; आधींच मर्कट तशांतहि मद्य प्याला । झाली तशांतचि तयासहि भूतबाधा ॥ "

**मात्स्यन्याय:** The simile drawn from fish. It is used to illustrate the oppression of the weak by the strong, " Might is right "; " Survival of the fittest." Read: मत्स्य एव मत्स्यं गिलति Śat. Br. 1. 8. 1; दुर्बलं बलवन्तो हि मत्स्या मत्स्यं विशेषतः । भक्षयन्ति सदा वृत्तिर्विहिता नः सनातनी ॥ Mb. 3. 190. 8; राजा चेन्न भवेल्लोके पृथिव्यां दण्डधारकः । जले मत्स्यानिवाभक्ष्यन् दुर्बलं बलवत्तराः ॥ अराजकाः प्रजाः पूर्वं विनेशुरिति नः श्रुतम् । परस्परं भक्षयन्तो मत्स्या इव जले कृशान् ॥ Mb. 13. 67. 16-17; Rām. 2. 67. 31; परस्परामिषतया जगतो भिन्नवर्त्मनः । दण्डाभावे परिध्वंसी मात्स्यन्यायो प्रवर्तते ॥ Kām. 2. 40.

**मानाधीना मेयसिद्धि:** To know the thing to be measured you must know the measure. मानाधीना मेयसिद्धिरिति न्यायेन प्रमाणस्य प्रथममुद्देशो तदनुसारेण लक्षणस्य कथनीयतया प्रथमोद्दिष्टस्य प्रमाणस्य प्रथमं लक्षणं कथ्यते । Sar. S. न्यायदर्शन.

**माषराशिप्रविष्टमषीन्याय:** The simile of a grain of soot in a heap of spotted beans. This is akin to the English proverb " a needle in a haystack ". शकारः–भावे भावे बालिए क्खु अंधआले माशलाशिपविष्टा विअ मशीगुडिआ दीशन्ती दीशन्ती जेव पणट्ठा वशंतशेणिआ Mk. 1.

**मिथिलायां प्रदीप्तायां न मे दह्यति किंचन** ( Mb. 12. 178 ) " If Mithilā should be in flames nothing of mine would be burnt up" (said by Janaka). It is used to indicate the freedom from anxiety of one who has nothing to lose. न ह्यस्यकर्म क्षीयते । कर्माभावादेवेति नित्यानुवादः । यथाविदुषः कर्मक्षयलक्षणं संसारदुःखं संततमेव न तथा तदस्य विद्यत इत्यर्थः । मिथिलायां...किंचनेति तद्वत् । Śaṁkara on Bṛi. Up. 1. 4. 15.

**मुण्डितशिरोनक्षत्रान्वेषणम्** Enquiring as to a suitable date for the shaving of one's head when one has already performed that ceremony. See : कृतक्षौरस्य नक्षत्रपरीक्षा.

**मुनिर्मनुते मूर्खो मुच्यते** A sage meditates on Brahman and a fool is emancipated. This illustrates an impossible sequence (असंगति ). "The fathers have eaten sour grapes and the children's teeth are set on edge." Ezekiel XVIII. 2. एतेनेदमपास्तं मुनिर्मनुते मूर्खो मुच्यत इत्येतच्छास्त्रफलं प्रयोक्तरि इति न्यायविरुद्धम् । तथा चाभाणकः 'काचिन्निषादी तनयं प्रसूते कश्चिन्निषादस्तु कषायपायी' इति । मुनिकर्तृकश्रवणादिविधिफलस्य साक्षात्कारस्य मूर्खेऽनभ्युपगमात् । वेदान्ततत्त्वविवेक.

**मृगतृष्णा ( तृष्णिका ) न्याय:** The simile of mirage. It illustrates that the existence of the universe is ill-founded, like a mirage. जातः सखे प्रणयवान् मृगतृष्णिकायाम् । Ś. 6. 16; मृगतृष्णारूपमेतद् दर्शनम् । ŚB. on MS. 9. 1. 31; रे चित्त चिन्तय चिरं चरणौ मुरारेः पारं गमिष्यसि यतो भवसागरस्य । पुत्राः कलत्रमितरे सुहृदः सहायाः सर्वं विलोकय सखे मृगतृष्णिकाभम् ॥

**मृतमारणन्याय:** Akin to ऊषरवृष्टिन्याय, अरण्यरोदनन्याय, पिष्टपेषणन्याय etc.

**यः कुरुते स एव भुङ्क्ते** He who performs an action will himself reap the fruit thereof, whether in the form of a reward or retribution. This doctrine is common to all the six orthodox schools. cf. the Marāṭhī proverb " करील तो भरील. "

**यः कारयति स करोत्येव** He who causes a thing to be done by another is himself the real doer of it. This nyāya is of common occurrence. एवमेकेनापि पिबता द्वौ पिबन्तावुच्येते । यद्वा जीवस्तावत् पिबतीश्वरस्तु पाययति पाययन्नपि पिबतीत्युच्यते । Śaṁkara on Muṇḍ 3. 1. 1.